# छत्तीसगढ़ माध्यमिक शिक्षा मण्डल, रायपुर
## शैक्षणिक सत्र 2021–22 माह अक्टूबर
## असाइनमेंट – 03
## कक्षा – बारहवीं
## विषय – संस्कृत

पूर्णांक–20

**निर्देश :– सर्वेषां प्रश्नानां समाधानं यथा निर्दिष्टं कुरुत।**

प्रश्न 1. अधोलिखितं श्लोकं पठित्वा प्रदन्तप्रश्नान् उत्तराणि संस्कृतभाषया लिखत (केषांश्चिद् पञ्चानाम्) अंक–5×1=05

दीर्घप्रयासेनकृतं हिवस्तु निमेषमात्रेण भजेद् विनाशम्।
कर्तुं कुलालस्य तु वर्षमेकं भेत्तुं हि दण्डस्य मुहुर्तमात्रम्।।
अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदम्।
भोजने चामृतं वारि भोजनान्ते विषापहम्।।

प्रश्नः (i) वस्तु केन विनाशं भजेत्?
(ii) 'कुम्भकारस्य' इति पदस्य पर्यायपदं किं प्रयुक्तम्?
(iii) वारि भोजनान्ते कीदृशं भवति?
(iv) 'भेषजं वारि' अनयोः पदयोः विशेषणपदं किं प्रयुक्तम्?
(v) 'दण्डस्य' इति पदे विभक्तिः अस्ति।
(vi) 'भोजनान्ते' इति पदस्य संधि–विच्छेदं कुरुत।

प्रश्न 2. अधोलिखितं गद्यांशं पठित्वा हिन्दी भाषया अनुवादं कुरुत। अंक–05

राज्ञः वहिन् प्रवेश कार्यक्रमं श्रुत्वा वत्सराजः बुद्धिसागरं नत्वा शनैः–शनैः प्राह–ताप। मया भोजराजो रक्षित एवास्ति। पुनः वुद्धिसागरेण तस्य कर्णे किमपि कथितम्, यन्निशम्य वत्सराजः ततो निष्क्रान्तः। पुनः राज्ञो वहिन–प्रवेशकाले कश्चन कापालिकः सभां समागतः।

प्रश्न 3. अधोलिखितानां प्रश्नानामुत्तराणि संस्कृतभाषया उत्तरत? (केषांश्चिद् पञ्चानाम्)

अंक–5×1=05

(i) शर्वरी केन भाति?
(ii) के सर्वलोकस्य दासाः सन्ति?
(iii) 'प्रविश्य' इति पदे को प्रत्ययः?
(iv) धाराराज्ये को राजा प्रजाः पर्यपालयत्?
(v) सभायां कीदृशः ब्राम्हणः आगतवान्?
(vi) वत्सराजः भोजं कुत्र नीतवान्?

क्रमशः.......02

प्रश्न 4. प्रदत्तशब्दसूची–सहाय्येन अधोदत्तां कथां पूरयित्वा लिखत –
(प्रसीदन्ति, नामभिः, लालयति, जीवनम् जलदः, पिपासा, ददामि, विद्युत्, मयूराः, जन्मस्थानम्) अंक – $10 \times \frac{1}{2} = 05$

सर्वेभ्यः जलं (i) .................... अहम् अतः जनाः मां मेघं, (ii) .................... वारिदः पयोदः इति (iii) ............................ अपि जानन्ति। सागरः मम (iv) .................... गगनं मम गृहं, धरा मम गन्तव्यम् अस्ति। (v) .................... मां प्रकाशयति, पवनः स्वाक्डे (vi) .................................... । बालाः मां दृष्यन्ति, जनाः (vii) ............................ कृषकाः मोदन्ते (viii) ............................................ च नृत्यन्ति।
तापेन व्याकुल धरायाः (ix) ........................................ मया एव शाम्यते। अहम एव सर्वप्राणिनां (x) ................................ अस्मि।